International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 16-19
© 2026 IJMH
www.themultijournal.com
Received: 19-08-2026
Accepted: 05-09-2026
Publish : 07-09-2026

**Sundram Mishra**
Research Scholar,
Shri Lal Bahadur Shastri National-Sanskrit University, New Delhi

**शोध निर्देशक**
**Dr.Naresh Kumar Bairwa**
Associate Professor,
Shri Lal Bahadur Shastri National-Sanskrit University, New Delhi-16

**Correspondence:**
**Sundram Mishra**
Research Scholar,
Shri Lal Bahadur Shastri National-Sanskrit University, New Delhi

# श्रीदुर्गासप्तशत्यां देवीगुणबोधकपदेषु स्त्रीप्रत्ययप्रयोगस्य वैशिष्ट्यम्

**The Distinctive Employment of Feminine Suffixes in the Quality-Denoting Epithets of the Goddess in the Śrī Durgā-Saptaśatī**

**Sundram Mishra, Dr.Naresh Kumar Bairwa**

**शोधसारः**

स्त्रीप्रत्ययाः पाणिनीयव्याकरणे प्रायेण लिङ्गानुशासनमात्रस्य साधनरूपेण गृह्यन्ते। प्रस्तुतं शोधपत्रं प्रतिपादयति यत् श्रीदुर्गासप्तशत्यां ते ततोऽधिकं कार्यं कुर्वन्ति — तत्र स्त्रीप्रत्ययः देव्याः स्त्रीत्वस्य प्रकारभेदम् अपि सूचयति। ग्रन्थे स्त्रीत्वप्राप्तेः द्वौ मार्गौ समान्तरं प्रवर्तेते — स्वाभाविकः, यत्र क्तिन्नन्तानि पदानि (शक्तिः, बुद्धिः, शान्तिः) नित्यस्त्रीलिङ्गत्वात् प्रत्ययान्तरं नैवापेक्षन्ते; आहार्यश्च, यत्र टाप्-ङीप्-ङीषां योजनया पदं स्त्रीलिङ्गं क्रियते। एतद् द्वैविध्यं दार्शनिकदृष्ट्यापि सार्थकम्। अपि च प्रदर्श्यते यत् स्त्रीप्रत्ययचयनं स्वतन्त्रं न, अपि तु कृत्तद्धितचयनस्य अनुवर्ति — अर्थः → कृत्तद्धितप्रत्ययः → प्रातिपदिकस्यान्तिमवर्णः → स्त्रीप्रत्ययः इति शृङ्खला विद्यते। समर्थनाय त्रीणि तुलनात्मकयुग्मानि परीक्षितानि, येषु 'आर्तिहरे' (टाप्) : 'आर्तिहारिणि' (ङीप्) इति युग्मम् अत्यन्तं निर्णायकम्।[1]

**मुख्यशब्दाः**

स्त्रीप्रत्ययः, टाप्, ङीप्, ङीष्, गौरादिगणः, षच्समासान्तः, नित्यस्त्रीलिङ्गम्, गुणबोधकपदम्, दुर्गासप्तशती, पाणिनीयव्याकरणम्।

## 1. भूमिका, शोधसमस्या, प्रविधिश्च

श्रीदुर्गासप्तशत्यां भगवत्याः यानि गुणबोधकपदानि प्रयुक्तानि, तेषु प्रायेण सर्वाणि स्त्रीलिङ्गानि।[2] एतत् स्वाभाविकम्, यतो विशेष्यं देवीपदं स्त्रीलिङ्गम्। किन्तु सूक्ष्मेक्षिकया दृश्यते यद् एतत् स्त्रीत्वं सर्वत्र एकेन प्रकारेण न सिध्यति — क्वचित् टाप्, क्वचिद् ङीप्, क्वचिच्च ङीष्; क्वचित् पुनः कोऽपि स्त्रीप्रत्ययो न योज्यते, तथापि पदं स्त्रीलिङ्गम् एव।

अद्यावधि प्रचलितेषु अध्ययनेषु एतानि पदानि प्रायेण दार्शनिकदृष्ट्या प्रतीकदृष्ट्या वा विवेचितानि; यत्र च व्याकरणदृष्टिः प्रवृत्ता, तत्रापि स्त्रीप्रत्ययाः केवलं लिङ्गानुशासनस्य साधनत्वेन गृहीताः, न तु अर्थवत्तया परीक्षिताः। एष एव शोधावकाशः प्रस्तुतपत्रेण पूरयितुम् इष्यते।

अतः शोधसमस्या द्विविधा — (क) किम् एतद् वैविध्यं प्रातिपदिकरूपस्य आनुषङ्गिकं फलमात्रम्, उत तत्र कश्चिद् अर्थगतोऽपि विन्यासः? (ख) किं स्त्रीप्रत्ययचयनं स्वतन्त्रम्, उत पूर्ववर्तिनः कृत्तद्धितचयनस्य अनुवर्ति? परिकल्पना — तद् अनुवर्ति एव, अर्थनियन्त्रितं च। प्रविधिः वर्णनात्मक-विश्लेषणात्मिका: प्रथमम् 1, 5, 7, 11 इत्येतेभ्योऽध्यायेभ्यो गुणबोधकपदानि सङ्गृहीतानि, ततः प्रत्येकस्य प्रकृति-प्रत्ययविभागः अष्टाध्यायीसूत्राधारेण कृतः, अन्ते च यत्र समानसन्दर्भे भिन्नौ प्रत्ययौ प्रयुक्तौ तत्र तुलनात्मकं परीक्षणम् (minimal-pair analysis) आश्रितम्।[3]

परिकल्पना इयम् — यदि स्त्रीप्रत्ययः स्वतन्त्रं चीयेत, तर्हि समानार्थके समानच्छन्दसि च सन्दर्भे प्रत्ययभेदः यादृच्छिकः स्यात्, प्रतिपदं च विकल्पावकाशो दृश्येत। यदि तु सोऽनुवर्ति, तर्हि प्रत्ययभेदः सर्वत्र प्रातिपदिकस्य अन्तिमवर्णभेदेन एव अनुगन्तव्यः स्यात्, विकल्पश्च प्रायेण न लभ्येत। अस्याः परिकल्पनायाः परीक्षणाय तुलनात्मकयुग्मानि एव समुचितं साधनम्, यतस्तत्र सन्दर्भ-छन्दो-वक्तृ-प्रयोजनानि समानानि सन्ति, भिन्नं च केवलं प्रातिपदिकम्।

### 2. स्त्रीत्वप्राप्तेः द्वौ मार्गौ

प्रथमः स्वाभाविको मार्गः — यत्र पदं स्वत एव स्त्रीलिङ्गम्, प्रत्ययान्तरं न याचते। तादृशानि क्तिन्नन्तानि पदानि[4] ग्रन्थे प्रचुराणि— शक्तिः, बुद्धिः, शान्तिः, क्षान्तिः, पुष्टिः, तुष्टिः, स्मृतिः, वृत्तिः, कान्तिः, सृष्टिः, स्थितिः, संहृतिः।[5] एतेषां घनतमं क्षेत्रं पञ्चमाध्यायस्य 'या देवी सर्वभूतेषु' इति स्तोत्रम्[6], यत्र देव्याः अन्तर्व्यापिनो रूपभेदाः गण्यन्ते।

अस्मिन् स्तोत्रे निरीक्षणीयम् एतत् — यत्र देवी 'सर्वभूतेषु संस्थिता' तत्र सा कर्त्री न, अपि तु भावः; अतस्तत्र एकमपि णिन्यन्तं कर्तृवाचकं पदं न लभ्यते, न च तत्र कश्चित् स्त्रीप्रत्ययो योजनीयः। अर्थात् अस्मिन् समग्रे प्रकरणे स्त्रीत्वं स्वभावसिद्धम् एव, न प्रत्ययसाध्यम्। एतद् वितरणम् एव प्रथमं सूचयति यत् स्त्रीत्वप्राप्तेः प्रकारः सन्दर्भस्य अर्थस्वरूपेण नियम्यते।

द्वितीय आहार्यो मार्गः — यत्र मूलतः पुंलिङ्गयोग्यं प्रातिपदिकं (हारिन्, खड्गिन्, वैष्णव, काल) टाप्-ङीप्-ङीषां योजनया स्त्रीलिङ्गीक्रियते। अत्र निरीक्षणीयम् — प्रथमे मार्गे देवी भावात्मिका अन्तर्व्यापिनी शक्तिः, द्वितीये तु सा अभिव्यक्ता क्रियाशीला उपकरणवती। अर्थात् मार्गभेदः सन्दर्भभेदानुगामी, न यादृच्छिकः।

अस्मिन् प्रसङ्गे 'कात्यायनी' (11.2, 11.25) 'नारायणी' (11.10) इति पदद्वयं पृथग् निर्देश्यम्। अनयोः तद्धितार्थः स्पष्टः, किन्तु स्त्रीप्रत्ययविधाने टीकाकाराणां वैमत्यम् — केचिद् गौरादिपाठाश्रयेण ङीषम् आहुः, अपरे च निपातनम्। अतः प्रस्तुते शोधे एते पदे साङ्ख्यिकगणनायाः बहिः स्थापिते, यतो विवादास्पदं निदर्शनं पक्षसाधने न प्रमाणम्।

### 3. आहार्यमार्गे प्रत्ययवितरणस्य नियमः

आहार्यमार्गे प्रत्ययचयनं प्रातिपदिकस्य अन्तिमवर्णेन पूर्णतया नियम्यते, स च अन्तिमवर्णः पूर्ववर्तिना कृत्तद्धितप्रत्ययेन। अदन्तेषु टाप्[7] (घोरा, दारुणा, करालवदना, सृष्टिरूपा, विश्वात्मिका, वरदा, चण्डिका); इन्नन्तेषु — णिनि-इनिनिष्पन्नेषु — ङीप्[8] (हारिणी, धारिणी, प्रदायिनी, खड्गिनी, चक्रिणी); अणन्तेषु मयडन्तेषु च ङीप् एव (वैष्णवी, माहेश्वरी, कौमारी, ऐन्द्री, गुणमयी); षित्प्रत्ययान्तेषु गौरादिपठितेषु च ङीष्[9] (शताक्षी, भीमाक्षी, गौरी, ईश्वरी, परमेश्वरी)।

टाप्प्रयोगे क्वचित् आनुषङ्गिको वर्णविकारोऽपि दृश्यते — प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य इकारादेशेन[10] साधक + टाप् → साधिका, आत्मक + टाप् → विश्वात्मिका, रक्तदन्तक + टाप् → रक्तदन्तिका। एतत् प्रदर्शयति यत् स्त्रीप्रत्ययः केवलं योज्यमानः न, अपि तु प्रातिपदिकस्य रूपम् अपि परिवर्तयति; तथापि तस्य योजनं पूर्वनिर्णीतेन अन्तिमवर्णेन एव नियम्यते।

ङीपः प्रवर्तकनिमित्तानि ग्रन्थे त्रीणि — इन्नन्तत्वम् (णिनि-इनिनिष्पन्नेषु हारिणी-खड्गिन्यादिषु), उगित्प्रत्ययान्तत्वम् (शतृ-प्रत्ययान्तेषु घातयन्ती-चर्वयन्त्यादिषु), अणादिप्रत्ययान्तत्वं च (वैष्णवी-माहेश्वर्यादिषु)। त्रीण्यपि निमित्तानि परस्परं भिन्नानि, फलं तु एकम् एव ङीप्। एतद् दर्शयति यत् स्त्रीप्रत्ययः अर्थं न पृच्छति, प्रातिपदिकस्य रूपम् एव पृच्छति।

ङीषः पुनः त्रीणि पृथक् निमित्तानि ग्रन्थे लभ्यन्ते — (क) षित्त्वम्, यथा बहुव्रीहौ अक्षिशब्दान्ते 'स्वाङ्गात् षच्' इति समासान्तात् शताक्षी भीमाक्षी च; (ख) गणपाठः, यथा गौरादिपठितेभ्यो गौरी, ईश्वरी, विश्वेश्वरी, परमेश्वरी; (ग) आनुगागमः, यथा ब्रह्माणी। त्रिष्वपि निमित्तं प्रातिपदिकनिष्ठम् एव, न अर्थनिष्ठम् — इदम् अपि स्त्रीप्रत्ययस्य अनुवर्तित्वं समर्थयति।

अत्र एका सूक्ष्मा प्रक्रिया द्रष्टव्या — बहुव्रीहिसमासे स्त्रीप्रत्ययः समुदायस्य अन्ते एव योज्यते, न तु पूर्वपदे, यतो हि समासः स्वयम् एकं प्रातिपदिकम्। यत्र च पूर्वपदं स्त्रीलिङ्गं तत्रापि उत्तरपदविधौ 'स्त्रियाः पुंवद्भाषितपुंस्कात्' (6.3.34) इति पुंवद्भावेन तस्य स्त्रीत्वं तिरोधीयते। एतेन ज्ञायते यत् स्त्रीप्रत्ययः पदस्य आन्तरिकम् अङ्गं न, अपि तु समग्रस्य प्रातिपदिकस्य अन्तिमः संस्कारः — इदम् एव शृङ्खलापक्षस्य अनुकूलम्।

एवं दृश्यते यत् स्त्रीप्रत्ययस्य चयने कवेः स्वातन्त्र्यं नास्ति; स तु पूर्वं कृतस्य अर्थनिर्णयस्य यान्त्रिकम् अनुवर्तनम्। शृङ्खला इयम् — अर्थः → कृत्तद्धितप्रत्ययः → प्रातिपदिकस्यान्तिमवर्णः → स्त्रीप्रत्ययः।[11]

### 4. निर्णायकं प्रमाणम् — त्रीणि तुलनात्मकयुग्मानि

यदि उपर्युक्ता शृङ्खला सत्या, तर्हि समानसन्दर्भे समानच्छन्दसि च प्रत्ययभेदः केवलं प्रातिपदिकभेदेन एव व्याख्यातुं शक्यः स्यात्, न कवेः रुचिवैचित्र्येण। त्रीणि युग्मानि तद् एव दर्शयन्ति।

**सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥ (11.12)**

**प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि॥ (11.35)**[12]

आर्तिहरा — आर्ति + हृ + अच्[13], अदन्तत्वात् टाप् अनिवार्यः ।

आर्तिहारिणी — आर्ति + हृ + णिनि[14], इन्नन्तत्वात् ङीप् अनिवार्यः।

अत्र धातुः, उपपदम्, अध्यायः, छन्दश्च समानम्; भिन्नस्तु प्रथमं कृत्प्रत्ययः, ततश्च अनिवार्यतया स्त्रीप्रत्ययः। यदि कविः छन्दोनुरोधमात्रेण चिनुयात्, तर्हि 'हरे' इत्यत्र ङीप्, 'हारिणि' इत्यत्र वा टाप् कदाचिद् आपतेत्; न तु तथा दृश्यते।

अत्र स्मर्तव्यं यत् पूर्वशोधपत्रे प्रतिपादितम् आसीत् — 'हरा' इति पचाद्यचा तात्कालिकं क्रियामात्रं बोध्यते, 'हारिणी' इति णिनिना तु आर्तिहरणं देव्याः स्वभाव एव (ताच्छील्यम्)। सोऽयम् अर्थभेदः प्रथमं कृत्प्रत्ययं नियमयति, स च कृत्प्रत्ययः स्त्रीप्रत्ययम्। एवं द्वे अपि शोधपत्रे एकाम् एव शृङ्खलाम् उभयतः पुष्णीतः।

द्वितीयं युग्मं सप्तमेऽध्याये एकादशश्लोकान्तरे — 'करालवदना' (7.6): 'भीमाक्षी' (7.17)।[15] उभे अपि बहुव्रीहिणी, उभे अपि मुखनेत्रवर्णनपरे; तथापि वदनान्ते समासान्ताभावाद् अदन्तत्वं ततश्च टाप्, अक्ष्यन्ते तु 'स्वाङ्गात् षच्' इति समासान्तः[16], षित्त्वाच्च ङीष्। एकस्मिन्नेव वर्णनप्रसङ्गे द्वौ भिन्नौ स्त्रीप्रत्ययौ केवलम् उत्तरपदभेदेन नियन्त्रितौ — इदम् एव पक्षस्य हार्दम्।

तृतीयं युग्मं 'महामाया' : 'महाकाली' — पूर्वत्र प्रातिपदिकं स्वयम् आबन्तं नित्यस्त्रीलिङ्गम्, उत्तरत्र तु गौरादिपाठाश्रयेण ङीष्।[17]
त्रिष्वपि युग्मेषु समानम् इदम् — सन्दर्भः, वक्ता, स्तुत्यविषयः, प्रायेण छन्दश्च अभिन्नम्; भिन्नं तु प्रातिपदिकस्य अन्तिमवर्णमात्रम्, तदनुसारं च स्त्रीप्रत्ययः। यत्र च कुत्रापि 'हरी' 'वदनी' 'भीमाक्षा' इत्यादिकं विपरीतं रूपं न दृश्यते, तत्र विकल्पाभावः एव नियमबद्धतां प्रमाणयति।

## 5. अभावसाक्ष्यम्

पाणिनिना षट् स्त्रीप्रत्ययाः विहिताः; ग्रन्थस्तु त्रीन् एव — टाप्, ङीप्, ङीषम् — प्रयुङ्क्ते। ङीन् (4.1.73), चाप् (4.1.74), डाप् (4.1.13) इत्येते त्रयः परीक्षितेषु अध्यायेषु एकवारमपि न प्रयुक्ताः।[18] एतद् अपि पूर्वोक्तां शृङ्खलाम् एव समर्थयति — यतो हि तेषां प्रवर्तकानि निमित्तानि (शाङ्गर्रवादिगणः, यङन्तम्, उभशब्दः) ग्रन्थस्य अर्थक्षेत्रे नैवोपतिष्ठन्ते। प्रत्ययाभावोऽपि प्रत्ययवितरणस्य नियमबद्धतां प्रमाणयति।
प्रविधिदृष्ट्यापि अयं बिन्दुः महत्त्वपूर्णः — यतो हि यदि प्रत्ययचयनं कवेः रुचिनियन्त्रितं स्यात्, तर्हि षट्स्वपि प्रत्ययेषु न्यूनाधिकः प्रयोगः प्रत्याश्येत। किन्तु त्रयाणां पूर्णः अभावः, त्रयाणां च नियमितः प्रयोगः — एतत् वितरणं यादृच्छिकतायाः विरुद्धं साङ्ख्यिकं साक्ष्यं ददाति।

## 6. स्त्रीप्रत्ययवितरणसारणी

| प्रत्ययः | सूत्रम् | प्रवर्तकं निमित्तम् | निदर्शनानि | सङ्ख्या |
|---|---|---|---|---|
| टाप् | 4.1.4 | अदन्तं प्रातिपदिकम् | घोरा, करालवदना, सृष्टिरूपा, विश्वात्मिका, वरदा, रक्तदन्तिका, चण्डिका | 20 |
| ङीप् | 4.1.5 | इन्नन्तम् (णिनि / इनि) | हारिणी, धारिणी, प्रदायिनी, खड्गिनी, चक्रिणी, रूपिणी | 16 |
| ङीप् | 4.1.6 | उगित्प्रत्ययान्तम् (शतृ) | घातयन्ती, चर्वयन्ती, भवती | 3 |
| ङीप् | 4.1.15 | अण्-ठक्-मयडन्तम् | वैष्णवी, माहेश्वरी, कौमारी, ऐन्द्री, कौशिकी, जगन्मयी | 10 |
| ङीष् | 4.1.41 (षित्) | षच्समासान्तः | शताक्षी, भीमाक्षी | 2 |
| ङीष् | 4.1.41 (गौरादि) | गणपाठः | गौरी, ईश्वरी, परमेश्वरी, अखिलेश्वरी | 6 |
| ङीष् | 4.1.49 | आनुगागमः | ब्रह्माणी (विवादास्पदम्) | 1 |
| ङीन् / चाप् / डाप् | 4.1.73 / 74 / 13 | शार्ङ्गरवादि / यङन्त / उभ | — (अप्रयुक्ताः) | 0 |
| प्रत्ययाभावः | 3.3.94 | क्तिन्नन्तं नित्यस्त्रीलिङ्गम् | शक्तिः, बुद्धिः, शान्तिः, क्षान्तिः, सृष्टिः, स्थितिः, संहतिः | 15 |

[19]

## 7. दार्शनिकं तात्पर्यम्

उपर्युक्तं द्वैविध्यं केवलं रूपशास्त्रीयं न, अपि तु सैद्धान्तिकम् अपि। यत्र देवी 'सर्वभूतेषु संस्थिता' अन्तर्व्यापिनी भावात्मिका शक्तिः, तत्र स्त्रीत्वम् आरोपणीयं नास्ति — तद् एव तस्याः स्वरूपम्; अतः क्तिन्नन्तं पदं स्वत एव स्त्रीलिङ्गम्। यत्र तु सा अभिव्यक्ता, आयुधधारिणी, वाहनवती, सम्बन्धनिबद्धा च, तत्र स्त्रीत्वं प्रत्ययद्वारा आधीयते। एवं व्याकरणप्रक्रिया स्वयमेव शाक्तसिद्धान्तस्य निष्कला-सकलाभेदं प्रतिबिम्बयति। इदम् अन्वेषणस्य दार्शनिकं फलितम्, यत् प्रस्तावरूपेण एव स्थाप्यते, न सिद्धान्तरूपेण।
अपि च शाक्तपरम्परायां निष्कला देवी सा या स्वरूपेण एव पूर्णा, कलाभेदरहिता; सकला तु सा या नाम-रूप-आयुध-वाहनादिभिः अभिव्यज्यते। दृश्यते यत् क्तिन्नन्तानि नित्यस्त्रीलिङ्गानि पदानि प्रथमां कोटिम्, प्रत्ययसाध्यानि च द्वितीयां कोटिम् अनुसरन्ति। न च वयं ब्रूमः यद् ग्रन्थकारेण एतत् सचेतनं कल्पितम्; किन्तु व्याकरणप्रक्रियायाः सिद्धान्तेन सह अयं समान्तरः पाठः स्वयमेव लक्ष्यते, स च शोधदृष्ट्या निर्देशार्हः।
अपरं च द्रष्टव्यम् — प्रथमेऽध्याये ब्रह्मस्तुतौ 'खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा' इत्यत्र देव्याः आयुधसम्बन्धः इनिना बोध्यते, तत्फलं च ङीप्; तस्मिन्नेव प्रकरणे 'लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च' इत्यत्र तस्याः भावात्मकं स्वरूपं क्तिन्नन्तैः, यत्र स्त्रीप्रत्ययस्य अवकाश एव नास्ति। एकस्मिन्नेव स्तोत्रे द्वयोः मार्गयोः समान्तरः प्रयोगः प्रस्तुतपक्षस्य दृढतमं सन्दर्भगतं समर्थनम्।

## 8. निष्कर्षाः

1. दुर्गासप्तशत्यां स्त्रीत्वप्राप्तेः द्वौ समान्तरौ मार्गौ — स्वाभाविकः (क्तिन्नन्तेषु) आहार्यश्च (टाप्-ङीप्-ङीषां योजनया); एतद् द्वैविध्यं देव्याः अन्तर्व्यापि-अभिव्यक्तस्वरूपभेदेन सङ्गच्छते।
2. स्त्रीप्रत्ययचयनं स्वतन्त्रं न, अपि तु कृत्तद्धित-समासान्तप्रक्रियायाः अनुवर्ति — अर्थः → कृत्तद्धितप्रत्ययः → प्रातिपदिकस्यान्तिमवर्णः → स्त्रीप्रत्ययः। अतः स्त्रीप्रत्ययवैचित्र्यं शैलीविकल्पो न, अपि तु अर्थनियन्त्रणस्य अन्तिमं फलम्।
3. अस्य निर्णायकं प्रमाणं त्रीणि युग्मानि — आर्तिहरा : आर्तिहारिणी (11.12, 11.35), करालवदना : भीमाक्षी (7.6, 7.17), महामाया : महाकाली।
4. ग्रन्थः षट्सु स्त्रीप्रत्ययेषु त्रीन् एव प्रयुङ्क्ते; अवशिष्टानां त्रयाणाम् अभावोऽपि नियमबद्धः, यतस्तेषां प्रवर्तकनिमित्तानि ग्रन्थस्य अर्थक्षेत्रे न सन्ति।
5. समासान्तप्रत्ययाः (षच्, कप्) स्त्रीप्रत्ययनिर्णये मध्यवर्तिनी कडी भवन्ति; तेषाम् उपेक्षया शताक्षी-रक्तदन्तिकादीनां प्रक्रिया न व्याख्यातुं शक्यते। अतः स्त्रीप्रत्ययाध्ययनं समासान्ताध्ययनेन सह एव कर्तव्यम्।

## 9. सीमा तथा आगामिशोधदिशा

सीमाद्वयं स्पष्टं स्वीक्रियते — प्रथमं, निदर्शनसङ्ग्रहः चतुर्षु एव अध्यायेषु सीमितः, अतः 'अप्रयुक्तः' इति निषेधात्मको दावः तावन्मात्रे क्षेत्रे प्रामाणिकः। द्वितीयं, ब्रह्माणी-कात्यायनी-नारायणीप्रभृतिषु टीकाकाराणां वैमत्यम् अद्यापि अनिर्णीतम्; तेषां पृथक् समीक्षा वाञ्छनीया।

प्रस्तुतं शोधपत्रं निदर्शनात्मकम्, चतुर्षु अध्यायेषु सीमितं च; निष्कर्षाणां दृढीकरणाय सम्पूर्णग्रन्थस्य निःशेषा साङ्ख्यिकी गणना अपेक्ष्यते। तदनन्तरं देवीभागवत-ललितासहस्रनाम्नोः स्त्रीप्रत्यय-वितरणेन सह तुलनात्मकम् अध्ययनं शाक्तवाङ्मये गुणबोधक-पदनिर्माणस्य ऐतिहासिकं विकासक्रमं प्रकाशयेत्।

अन्ते इदम् अपि निर्देश्यम् — प्रस्तुता प्रविधिः न केवलं दुर्गासप्तशत्यां प्रयोज्या; यत्र कुत्रापि स्तोत्रकाव्ये प्रत्ययवैचित्र्यं छन्दोनुरोधजन्यम् इति सामान्या धारणा प्रचलति, तत्र तुलनात्मकयुग्मपरीक्षणेन सा धारणा परीक्षितुं शक्यते। एवं शोधफलम् एकग्रन्थसीमां व्यतिक्रम्य प्रविधिरूपेण अपि उपयोगि भवेत्।

## सन्दर्भग्रन्थसूची


दुर्गासप्तशती (देवीमाहात्म्यम्), सटीका सभाषानुवादा, गीताप्रेस, गोरखपुर।

दुर्गासप्तशती सप्तटीकासमलङ्कृता, खेमराज श्रीकृष्णदास, वेङ्कटेश्वर प्रेस, मुम्बई।

भास्करराय मखी, गुप्तवती (दुर्गासप्तशतीटीका)।

पाणिनि, अष्टाध्यायी (सूत्रपाठः), चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी।

वामन-जयादित्यौ, काशिकावृत्तिः, चौखम्बा संस्कृत सीरीज, वाराणसी।

भट्टोजि दीक्षित, वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता), मोतीलाल बनारसीदास, दिल्ली।

पतञ्जलि, व्याकरणमहाभाष्यम्, चौखम्बा, वाराणसी।

शास्त्री, चारुदेव, व्याकरणचन्द्रोदयः, मोतीलाल बनारसीदास, दिल्ली।

Coburn, Thomas B. Devī-Māhātmya: The Crystallization of the Goddess Tradition. Delhi: Motilal Banarsidass, 1984.

Cardona, George. Pāṇini: A Survey of Research. Delhi: Motilal Banarsidass, 1980.


## पाद टिप्पणी

1. प्रस्तुतं शोधपत्रं लेखकस्य पूर्वप्रकाशितस्य 'गुणबोधकपदेषु कृत्तद्धितप्रत्ययप्रयोगवैशिष्ट्यम्' इति शोधपत्रस्य अनुवर्तिः; तत्र प्रतिपादितं यत् कृत्प्रत्ययचयनम् अर्थनियन्त्रितम्। अत्र तस्य फलितं स्त्रीप्रत्ययक्षेत्रे परीक्ष्यते।
2. श्लोकसङ्ख्या गीताप्रेस-गोरखपुर-संस्करणानुसारिणी; पाणिनिसूत्रनिर्देशः अष्टाध्याय्याः अध्याय-पाद-सूत्रक्रमेण।
3. 'स्त्रियाम्' — पा.सू. 4.1.3 इत्यधिकारे टाप्, चाप्, डाप्, ङीप्, ङीष्, ङीन् इति षट् स्त्रीप्रत्ययाः विहिताः।
4. 'स्त्रियां क्तिन्' — पा.सू. 3.3.94। भावार्थे विहितः क्तिन् नित्यं स्त्रीलिङ्गं रूपं जनयति, अतः प्रत्ययान्तरं नापेक्षते।
5. दुर्गासप्तशती 1.80 — 'लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च'। तुल्यं 1.76-77 — सृष्टिरूपा, स्थितिरूपा, संहृतिरूपा।
6. पञ्चमेऽध्याये 'या देवी सर्वभूतेषु … रूपेण संस्थिता' इति स्तोत्रम्। अस्य श्लोकसङ्ख्या संस्करणभेदेन भिद्यते, अतोऽत्र अध्यायनिर्देशमात्रं कृतम्।
7. 'अजाद्यतष्टाप्' — पा.सू. 4.1.4। अदन्तात् प्रातिपदिकात् स्त्रियां टाप्।
8. 'ऋन्नेभ्यो ङीप्' — पा.सू. 4.1.5; इन्नन्तत्वात् हारिन्, धारिन्, खड्गिन् इत्यादिभ्यो ङीप्। तुल्यम् 'उगितश्च' 4.1.6 (शतृ-भवत्-अन्तेषु), तथा 'टिड्ढाणञ्…' 4.1.15 (अण्-ठक्-मयडन्तेषु)।
9. 'षिद्गौरादिभ्यश्च ङीष्' — पा.सू. 4.1.41। षित्प्रत्ययान्तेभ्यो गौरादिगणपठितेभ्यश्च ङीष्।
10. 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' — पा.सू. 7.3.44। आबन्ते प्रत्ययस्थस्य ककारात् पूर्वस्य अकारस्य इकारादेशः।
11. 'ब्रह्माणी' (11.13) इत्यत्र आनुगागमपूर्वकं ङीष् प्रयुज्यते; किन्तु 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (4.1.49) इति सूत्रपाठे 'ब्रह्मन्' शब्दः न पठितः। अतो रूपम् आर्षप्रयोगत्वेन गणपाठविस्तारेण वा साधनीयम् — अयं बिन्दुः शोधे विवादास्पदत्वेन एव निर्दिश्यते।
12. दुर्गासप्तशती 11.12 — 'सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते'; 11.35 — 'देवि विश्वार्तिहारिणि'। उभयत्र हृ-धातुः, आर्ति-उपपदम्, अनुष्टुप्छन्दश्च समानम्।
13. 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' — पा.सू. 3.1.134; पचादिगणात् कर्तरि अच्, तेन 'हर' इत्यदन्तं रूपम्।
14. 'सुप्यजातौ णिनिस्ताच्छील्ये' — पा.सू. 3.2.78। 'ताच्छील्ये' इति पदं निर्णायकम् — णिनिः स्वभावसिद्धां नित्यां क्रियां बोधयति, न आगन्तुकीम्।
15. दुर्गासप्तशती 7.6 — 'काली करालवदना विनिष्क्रान्तासिपाशिनी'; 7.17 — 'भीमाक्षीं तां महासुरः'। एकादशश्लोकान्तरे उभे अपि बहुव्रीहिणी मुखनेत्रवर्णनपरे।
16. 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' — पा.सू. 5.4.113। 'स्वाङ्गात्' इति शर्तः उभयत्रापि (11.47, 7.17) देव्याः स्वकीयनयनवर्णनात् पूर्णा।
17. महामाया-महाकाल्योः पदयोः माया-शब्दः स्वयम् आबन्तो नित्यस्त्रीलिङ्गः, कालशब्दात्तु गौरादिपाठाश्रयेण ङीष्। अस्मिन् विषये टीकाकाराणां किञ्चिद् वैमत्यम् अस्ति, अतोऽत्र इदं युग्मं समर्थकरूपेण एव गृहीतम्, न निर्णायकरूपेण।
18. अयम् 'अभावः' परीक्षितानाम् अध्यायानां (1, 5, 7, 11) सीमायाम् एव प्रमाणिकः; सम्पूर्णग्रन्थविषये निषेधात्मको दावः पूर्णगणनाम् अपेक्षते।
19. सङ्ख्याः प्रस्तुतशोधपत्रे परिगणितानां निदर्शनानाम्, न तु सम्पूर्णग्रन्थस्य निःशेषा गणना (exhaustive census)।